# अर्थावबोधन-प्रक्रिया

## (व्याकरणशास्त्रस्य परिप्रेक्ष्ये)

**डॉ. संदीपकुमारदुबे**
वरिष्ठशोधाध्येता, सं.सं.प्र.

**सारांशः**

*यदा वयं स्वविचारान् उपस्थापयितुम् आरभामहे तदा शब्दानाम्, शब्देभ्यः जनितानाम् अर्थानाञ्च विचारं मनसि पूर्वं कुर्मः एव। तेन ज्ञायते यत् 'एषः शब्दः अमुम् अर्थं बोधयति' इति। अत एव अस्माभिः तादृशानां शब्दानां प्रयोगः क्रियते, अर्थात् अर्थानुगुणं शब्दानां प्रयोगः क्रियते। श्रोतारः अपि तादृशान् शब्दान् श्रुत्वा अर्थावगमनं कुर्वन्ति। ते जानन्ति यत् प्रकृति-प्रत्ययनियमात् 'एषः शब्दः अस्मिन् अर्थे शक्तः' इति। अत एव श्रोतृभिः तादृशाः अर्थाः अवगम्यन्ते। यत्र एकस्यैव शब्दस्य बहवः अर्थाः भवन्ति तत्र कतिथः अर्थः ग्राह्यः ? इत्यस्मिन् विषये भ्रमः भवति। यथा 'सैन्धवम् आनय' इत्यस्मिन् वाक्ये क्लीबे विद्यमानस्य 'सैन्धव' इति शब्दस्य अनेके अर्थाः सन्ति। तेषु लवणमणिबन्धयोः कस्य आनयनं स्यादिति श्रोतुः मनसि भ्रमः जायते। एतादृशं भ्रमं निवारयितुं प्रस्तुतोऽयं शोधलेखः।*

**प्रस्तावना**

वक्ता यदा स्वविचारान् उपस्थापयितुम् आरभते तदा शब्दानाम्, शब्देभ्यः जनितानाम् अर्थानाञ्च विचारं मनसि पूर्वं करोत्येव। तेन ज्ञायते यत् **'एषः शब्दः अमुम् अर्थं बोधयति'** इति। अत एव वक्त्रा तादृशानां शब्दानां प्रयोगः क्रियते, अर्थात् अर्थानुगुणं शब्दानां प्रयोगः क्रियते। श्रोतारः अपि तादृशान् शब्दान् श्रुत्वा अर्थावगमनं कुर्वन्ति। ते जानन्ति यत् प्रकृति-प्रत्ययनियमात् **'एषः शब्दः अस्मिन् अर्थे शक्तः'** इति। अत एव श्रोतृभिः तादृशाः अर्थाः अवगम्यन्ते।

अर्थबोधन-प्रक्रियायां शब्दानाम् अर्थः तस्य बोधश्च प्रकृतिप्रत्ययात्तु भवत्येव क्वचित् तद्भिन्नः अपि अर्थः दृश्यते। यत्र एकस्यैव शब्दस्य बहवः अर्थाः भवन्ति तत्र कतिथः अर्थः ग्राह्यः ? इत्यस्मिन् विषये भ्रमः भवति। यथा **'सैन्धवम् आनय'** इत्यस्मिन् वाक्ये क्लीबे विद्यमानस्य **'सैन्धव'** इति शब्दस्य अनेके अर्थाः सन्ति। तेषु लवणमणिबन्धयोः कस्य आनयनं स्यादिति श्रोतुः मनसि भ्रमः जायते। एवञ्च यदा कदाचित् शिशोः चपलत्वं दृष्ट्वा **'एषः वानरः'** इत्यपि उच्यते। अत्र **'वा विकल्पितो नरः! यद्वा वानं वने भवं फलादिकं रातीति[1]। रा + कः = वानरः'** इत्यर्थः कोषात् निस्सरति। परन्तु प्रकृतिप्रत्ययाभ्यां सञ्जातः एतादृशः अर्थः नापेक्षितः अपि तु चपलत्वं यद् वानरे विद्यते तद् अत्रापि दृश्यते इति वक्तुः अभिप्रायः। एतादृशाः अर्थाः अभिप्रायाश्च प्रकृतिप्रत्ययाभ्यां लक्षणैः (सूत्रैः) वा न ज्ञायन्ते अपि तु शक्त्या एव। सा च शक्तिः त्रिधा –

1- रूढिः
2- योगः
3- योगरूढः च।

[1] शब्दकल्पद्रुमः।

1- **रूढिः** – या शक्तिः प्रकृति-प्रत्यययोः द्वयोः समुदायस्य अर्थं बोधयति न तु कस्याप्येकस्य सा शक्तिः रूढिः इत्युच्यते। यथा - रत्नविशेषे भ्वादिगणपठितात् **'मण्'** धातोः **इन्**-प्रत्ययात्[2] (औणादिकः) मण् + इन् = 'मणि'शब्दः निष्पद्यते। अत्र रत्नविशेषः अर्थः समुदाये विद्यमानयोः द्वयोः प्रकृति-प्रत्यययोः अस्ति न तु कस्याप्येकस्य।

2- **योगः** – शब्दे विद्यमानानाम् अवयवानाम् अर्थप्रतिपादिका शक्तिः योगशक्तिः इत्युच्यते। यथा - पाकक्रियाकर्ता इत्यस्मिन्नर्थे **'पच्'** धातोः कर्तरि **ण्वुल्**-प्रत्यये[3] जाते सति **'पाचकः'** इति निष्पद्यते। अत्र **पच्**-धातोः **पाकक्रिया**, **ण्वुल्**-प्रत्ययस्य **कर्ता** इत्यनयोः द्वयोः प्रकृति-प्रत्यययोः अर्थः समुदाये **'पाचक'** इति शब्दे दृश्यते।

3- **योगरूढः** – अवयवार्थेन सम्बद्धस्य विशेष्यभूतार्थस्य प्रतिपादिका शक्तिः योगरूढः इत्युच्यते। यथा – 'पद्मम्' इत्यस्मिन् अर्थे पङ्कजम् इति प्रयुक्तम्। पङ्कात् पङ्के वा जायते इति पङ्कजम्, अत्र **पङ्कजनिकर्तारः** अन्येऽपि (शैवालादयः) भवितुमर्हन्ति तथाऽपि पद्मम् एव गृह्यते। अमी विशेष्यभूतार्थाः अवयव-समुदायाभ्यां प्रतीयन्ते।

एषा शक्तिः संयोगादिकारणैः (हेतुभिः) नानार्थकान् शब्दान् नियमयति। तथा च उक्तं भर्तृहरिणा वाक्यपदीये –

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता।**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।**
**शब्दार्थस्यानवच्छेदे[4] विशेषस्मृतिहेतवः॥**

**संयोगः** – प्रसिद्धः सम्बन्धः।

**विप्रयोगः** – प्रसिद्धसम्बन्ध-विच्छेदः।

**साहचर्यम्** – सादृश्यम्, न तु सहचरणम् इति।

**विरोधिता** – विरोधः।

**अर्थः** – प्रयोजनम्।

**प्रकरणम्** – वक्तृश्रोत्रोः प्रकृतौ अवस्थानम्, प्रसङ्गानुसारं कार्ये प्रवृत्तिः वा।

**लिङ्गम्** – पक्षान्तरस्य व्यावर्तकः धर्मविशेषः।

**सन्निधिः** – सन्निधानम् (नानार्थकपदस्य पदसमभिव्याहारात् एकस्मिन्नर्थे निश्चयः)।

**सामर्थ्यम्** – कारणम् (तच्च द्विविधं शब्दगतमर्थगतञ्च)।

**औचिती** – योग्यता।

---

2 'सर्व्वधातुभ्यः इन्' *(उणा. 4-117)*।

3 *'ण्वुल्तृचौ' (पा. सू. 3.1.133)*।

4 वाक्यपदीयम् (2. 317-318)।

**देशः** – स्थानविशेषः (ग्रामादिः)।

**कालः** – समयविशेषः (दिवसादिः)।

**व्यक्तिः** – लिङ्गम् (क्लीबादिलिङ्गम्)।

**स्वरः** – अचां भेदाः उदात्तादयः।

वाच्यवाचकभावे एतैः चतुर्दशकारणैः (हेतुभिः) नानार्थकानां शब्दानाम् अर्थनिश्चयः क्रियते, अर्थात् एते अर्थनियामकाः इत्यपि वक्तुं शक्यते।

अस्यां कारिकायां 'स्वरादयः' इत्युक्तं वर्तते। अत्र सन्देहः भवति यत् 'आदि' (स्वर-आदयः) इत्यस्य पदस्य कोऽर्थः ? तदा व्याख्याकारैः उच्यते यत् कारिकायाम् 'आदि'शब्दः सादृश्यार्थे वर्तते इति। अर्थात् पूर्वोक्तानि कारणानि तु अर्थनियामकानि सन्ति एव। इतोऽपि अन्यानि एतादृशानि कारणानि सन्ति यैः अर्थनिश्चयः अर्थपरिवर्तनञ्च भवति। यथा – सुपूर्वकात् उभयपदिनः **षिच** क्षरणे इति धातोः क्त-प्रत्यये[5] सति 'सुसिक्तम्' 'सुषिक्तम्' इति रूपद्वयं निष्पद्यते। यदा ***'सुः पूजायाम्'*** *(पा. सू. 1.4.94)* इत्यनेन कर्मप्रवचनीयसञ्ज्ञा भवति तदा 'सुसिक्तम्' इति। यदा उपसर्गसञ्ज्ञा भवति तदा तु ***'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्'*** *(पा. सू. 8.3.65)* इत्यनेन षत्वादेशे सति 'सुषिक्तम्' इति भवति। **सु**सिक्तम् **सु**षिक्तम् इत्यनयोः द्वयोः पदयोः 'सु' इति पृथक् पृथक् अर्थे वर्तते। तथा हि 'सुसिक्तम्' इति प्रसंशायाम्, 'सुषिक्तम्' इति निन्दायाञ्चार्थे विद्यते (अत्र एषः एव 'सु'शब्दः यदि कर्मप्रवचनीयसञ्ज्ञकः अस्ति तर्हि प्रसंशायां सुसिक्तम् इति भवति, एवम् उपसर्गः अस्ति चेत् निन्दायां सुषिक्तम् इति भवतीति वर्तते अत्र विशेषः)। अतः कर्मप्रवचनीय-उपसर्गौ अपि वाच्यवाचकभावे हेतू भवतः इति **'आदि'**पदेन ज्ञायते।

यद्यपि अर्थप्रवृत्तौ शब्दः एव कारणम्, अर्थविषयिण्यः याः प्रवृत्तयः भवन्ति ताः सर्वाः शब्दद्वारैव सम्भवन्ति, एवञ्च शब्दसाधुत्वख्यापनं (शब्दज्ञानम्) व्याकरणेन भवति इति ज्ञायते, तथाऽपि अर्थप्रवृत्तौ वक्तुः इच्छा मूलं कारणं (मूलं तत्त्वम्) वर्तते, न तु पदपदार्थादिकम्। कक्ष्यायाम् असति शिक्षके छात्राः कोलाहलं कुर्वन्तः आसन् तदा '**अलं कोलाहलेन**' इति वक्तुकामः शिक्षकः कक्ष्याम् आगत्य कोपेन वदति यत् '**एष आपणो वा**' ? इति। तदनन्तरं सर्वे छात्राः तूष्णीं भूत्वा अध्ययने संलग्नाः भवन्ति। अस्मिन् वाक्ये 'यथा क्रेतव्यस्य द्रव्यस्य मूल्यनिर्धारणे प्रतिप्रश्नवचनात्मको व्यवहारः (कोलाहलः) जनैः क्रियते, तद्वदेव भवन्तः सर्वे छात्राः अपि कुर्वन्तः सन्ति, अतः एवं मा कुर्वन्तु' इति वक्तुः (शिक्षकस्य) अभिप्रायः। अत्र व्युत्पत्त्या 'आङ् इत्युपसर्गपूर्वकात् आत्मनेपदिनः पण (व्यवहारे) इत्यस्मात् धातोः अच्-प्रत्ययेन **पण्यविक्रयशाला** इत्यस्मिन् अर्थे आपणशब्दः निष्पद्यते। व्याकरणदिशा '**एष आपणो वा**' ? इत्यस्य '**एषा पण्यविक्रयशाला वा**' ? इति प्रश्नात्मकं वाक्यं सम्भवति, परन्तु नैष वक्तुः आशयः। अतः अर्थप्रवृत्तौ मूलं कारणं वक्तुः इच्छा एव स्वीकरणीया भवति इति।

सर्वो हि व्यवहारः शब्दमूलः, शब्देन विना कस्यापि पदार्थस्य व्यवहारः न भवति इति सर्वैः ज्ञायते एव। वक्ता स्वकीयाम् इच्छां प्रकटयितुं शब्दं व्यवहरति, तेन शब्देन विना अर्थात् शब्दोच्चारणेन विना कस्यापि अर्थस्य अवगमनं कर्तुं न शक्यते। परन्तु

---

[5] 'निष्ठा' *(पा. सू. 3.2.102)*।

शब्दोच्चारणात् प्राग् साध्वसाधुविषयकः विचारः तु करणीयः एव। वाच्यवाचकभावे शब्दः वाचकः भवति, शब्देन प्रतिपाद्यः यः पदार्थः अर्थश्च सः वाच्यः भवति । यथा – 'गो' इति शब्दोच्चारणेन सास्नादिमतः आकृतिविशेषस्य बोधः भवति, 'घट' इति शब्दोच्चारणेन कम्बुग्रीवादिमतः आकृतिविशेषस्य बोधो भवति । अत्र सास्नादिमान् आकृतिविशेषः वाच्यः, तस्य गोशब्दः वाचकः अस्ति। कम्बुग्रीवादिमान् आकृतिविशेषः वाच्यः, तस्य घटशब्दः वाचकः अस्ति। एवमेव अन्येऽपि शब्दाः ज्ञेयाः।

यद्यपि '**शब्दार्थयोस्तादात्म्यम्**' इति तादात्म्यसम्बन्धम् अवलम्ब्य एव '*यः शब्दः सोऽयमर्थः, योऽर्थः सोऽयं शब्दः*' इति सिद्धान्तः प्रस्फुटति, तथाऽपि सर्वे शब्दाः सर्वविधान् अर्थान् वक्तुं समर्थाः न भवन्ति, एतदर्थं कार्य-कारणभावस्य कल्पना अपि अनिवार्या । अत एव नागेशभट्टैः उच्यते यत् - '*तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति*[6] *तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः*' इति। अर्थात् कारणं विना कार्यन्न सम्भवति इति सर्वैः ज्ञायते। अतः शाब्दबोधं प्रति (कार्यं प्रति) एकं कारणमपि कल्पनीयम्, तच्च कार्यकारणभावः इति । यथा – घटत्वादिधर्मावच्छिन्नघटादिविषयकशाब्दबोधं प्रति घटत्वादिधर्मावच्छिन्ना या वृत्तिः तद्वृत्तिविशिष्टं ज्ञानं कारणं भवति इति आशयः। अत्र घटत्वप्रकारघटविशेष्यकशाब्दबोधः भवति। अत एव घटपदेन पटस्य ज्ञानं न भवति। अत्र घटत्वप्रकारं कारणं पटविशेष्यकशाब्दबोधं प्रति कारणाभावात्। अनया रीत्या एव गुडोच्चारणेन मधुरस्य ज्ञानं न भवति, अत्र गुडत्वधर्मावच्छिन्ना कारणता गुडत्वादिधर्मावच्छिन्नगुडादिविषयकं प्रति वर्तते न तु मधुरत्वादिधर्मावच्छिन्नमधुरादिविषयकं प्रति ।

यदि 'शब्दार्थयोस्तादात्म्यम्' (अभेदसम्बन्धः) अस्ति तर्हि नानार्थकेषु शब्देषु अतिव्याप्तिः प्रसज्येत ? इति कैश्चिद् आक्षिप्यते। तन्न। कथमिति चेत् **अर्थभेदात् शब्दभेदः** इत्यनेन नानार्थकस्य शब्दस्य तत्तदर्थेन सह पृथक् पृथक् सम्बन्धः भवति। तत्र तु समानानुपूर्व्या नानार्थेषु एकः एव शब्दः अस्माभिः व्यवह्रियते। वस्तुतः पृथक् पृथक् अर्थेषु पृथक् पृथक् शब्दाः भवन्ति परन्तु तेषां शब्दानां समानानुपूर्व्या एकः एव शब्दः नानार्थेषु विद्यते इति उच्यते। एतत्तु व्यावहारिकं ज्ञानन्न तु सैद्धान्तिकमिति। यथा – **लवणार्थे** 'स+ऐ+न्+ध्+अ+व्+अ+म्' (सैन्धवम्), **मणिबन्धार्थे** 'स+ऐ+न्+ध्+अ+व्+अ+म्' (सैन्धवम्) इति पृथक् पृथक् अर्थे समानानुपूर्वी सैन्धवशब्दस्य दृश्यते। अत्र एकस्यैव समानानुपूर्विविशिष्टस्य सैन्धवशब्दस्य द्वयोः अर्थयोः तादात्म्यं नास्ति, अपि तु लवणार्थे अन्यस्य सैन्धवशब्दस्य तादात्म्यं मणिबन्धार्थे च अन्यस्य सैन्धवशब्दस्य तादाम्यं विद्यते । अतः शब्दार्थयोस्तादात्म्यम् इति सिद्धान्ताङ्गीकारे नास्ति दोषः इति।

शब्दार्थयोस्तादात्म्यम् इति सिद्धान्ताङ्गीकारे '*सः हरिं दृष्ट्वा हरिं स्मरति*' इत्यत्र वारद्वयं **हरि**शब्दः किमर्थं प्रयुक्तः, एकेनैव हरिशब्देन सिंहस्य विष्णोः च अर्थबोधः स्यात्? इति कैश्चित् आशङ्क्यते। तत्तु नोचितम्। यतो हि समानानुपूर्व्यां दृष्टायां सत्यामपि सिंहस्य बोधनार्थं पृथक् हरिशब्दः प्रयोक्तव्यः, विष्णोः बोधनार्थं पृथक् हरिशब्दः प्रयोक्तव्यः। अर्थात् अर्थभेदात् पृथक् पृथक् शब्दः प्रयोक्तव्यः इति भावः । अत्र '**प्रत्यर्थं शब्दाभिनिवेशः**[7]' इति भाष्यसिद्धान्तोऽपि प्रमाणम् । अस्मिन् विषये '*सूत्रप्रयोजनाधिकरणम् । किमर्थं पुनः इदमुच्यते ? प्रत्यर्थं शब्दाभिनिवेशात् न एकेन अनेकस्य अभिधानम् – प्रत्यर्थं शब्दाभिनिविशन्ते। किमिदं प्रत्यर्थमिति ? अर्थम् अर्थं प्रति प्रत्यर्थम्। प्रत्यर्थं शब्दाभिनिवेशात्। एतस्मात् कारणात् न एकेन शब्देन अनेकस्य अर्थस्य अभिधानं प्राप्नोति*' इति भाष्यम्, '**सरूपाणामेकशेष एकविभक्तौ**' *(पा. सू. 1.2.64)* इति

[6] परमलघुमञ्जूषायाः शक्तिनिरूपणप्रकरणे।

[7] 'सरूपाणामेकशेष एकविभक्तौ' *(पा. सू. 1.2.64)* इति सूत्रस्य व्याख्याने।

सूत्रव्याख्यानावसरे भगवता पतञ्जलिना उक्तम् । एतेन ज्ञायते यत् पृथक् पृथक् अर्थबोधनार्थं पृथक् पृथक् शब्दः प्रयोक्तव्यः, न तु एकेनैव शब्देन अनेकेषां पदार्थानां बोधः शक्यः ।

वस्तुतः सूक्ष्मेक्षिकया दृष्ट्या द्रक्ष्यामश्चेत् **'प्रत्यर्थं शब्दाभिनिवेशः'** इति सिद्धान्तः महर्षिणा पाणिनिना एव प्रतिपादितः, अन्यथा **'सरूपाणामेकशेष एकविभक्तौ'** *(पा. सू. 1.2.64)* इति सूत्रस्य का आवश्यकता ? सूत्रमेतत्तु तदैव कल्पितं यदा जामदग्नेः वाचकः रामशब्दः, दाशरथेः वाचकः रामशब्दः बलरामस्य वाचकः रामशब्दः च पृथक् पृथक् वर्तते । एवञ्च त्रयाणां शब्दानां बोधनार्थं त्रयः रामशब्दाः उच्चारणीयाः स्युः ? उच्चारणे सति गौरवापत्तिः । तथा च *'बालकाः धावन्ति'* इत्यस्मिन् वाक्ये अनन्ताः बालकाः अपि कल्पनीयाः स्युः ? कल्पिते सति महद्गौरवम् । अतः महर्षिणा पाणिनिना **'सरूपाणामेकशेष एकविभक्तौ'** *(पा. सू. 1.2.64)* इति एकशेषविधायकं शास्त्रं कल्पितम् । एकशेषविधायके शास्त्रे कल्पिते सति त्रिषु रामशब्देषु एकः एव रामशब्दः शिष्यते, एवञ्च *'यः शिष्यते स लुप्यमानर्थाभिधायी'* इति नियमानुरोधात् बहुत्वविवक्षायां प्रातिपदिकात् रामशब्दात् बालकशब्दाच्च जसि प्रत्यये सति *'रामाः सन्ति' 'बालकाः धावन्ति'* इत्यादीनि वाक्यानि अपि साधूनि भवन्ति ।

## सन्दर्भ-ग्रन्थाः :


1. **शब्दकल्पद्रुमः**, चौखम्भा-संस्कृतसीरीज-आफिस, वाराणसी-1, 1967
2. **सिद्धान्तकौमुदी**, निर्णयसागराख्यमुद्रणालयः मुम्बयी, 1929
3. **वाक्यपदीयम्**, चौखम्भाविद्याभवनम्, वाराणसी, द्वितीयसंस्करणम्, 1997
4. **परमलघुमञ्जूषा**, चौखम्भासुरभारती-प्रकाशनम्, वाराणसी, द्वितीयसंस्करणम्, 1998
5. **व्याकरणमहाभाष्यम्,** चौखम्भासंस्कृतप्रतिष्ठानम्, देहली, पुनर्मुद्रितसंस्करणम्, 1991